# ॥ गंगा माता स्तोत्रम् ॥

देवि सुरेश्वरि भगवति गङ्गेत्रिभुवनतारिणि तरलतरङ्गे ।

शङ्करमौलिविहारिणि विमले मममतिरास्तां तव पदकमले ॥ १ ॥

भागीरथिसुखदायिनि मातस्तवजलमहिमा निगमे ख्यातः ।

नाहं जाने तव महिमानंपाहि कृपामयि मामज्ञानम् ॥ २ ॥

हरिपदपाद्यतरङ्गिणि गङ्गेहिमविधुमुक्ताधवलतरङ्गे ।

दूरीकुरु मम दुष्कृतिभारंकुरु कृपया भवसागरपारम् ॥ ३ ॥

तव जलममलं येन निपीतंपरमपदं खलु तेन गृहीतम् ।

मातर्गंगे त्वयि यो भक्तःकिल तं द्रष्टुं न यमः शक्तः ॥ ४ ॥

पतितोद्धारिणि जाह्नविगङ्गे खण्डितगिरिवरमण्डितभङ्गे ।

भीष्मजननि हे मुनिवरकन्येपतितनिवारिणि त्रिभुवनधन्ये ॥ ५ ॥

कल्पलतामिव फलदां लोकेप्रणमति यस्त्वां न पतति शोके ।

पारावारविहारिणि गङ्गेविमुखयुवतिकृततरलापाङ्गे ॥ ६ ॥

तव चेन्मातः स्रोतः स्नातःपुनरपि जठरे सोपि न जातः ।

नरकनिवारिणि जाह्नवि गङ्गेकलुषविनाशिनि महिमोत्तुङ्गे ॥ ७ ॥

पुनरसदंगे पुण्यतरंगे जयजय जाह्नवि करुणापांगे ।

इंद्रमुकुटमणिराजितचरणेसुखदे शुभदे भृत्यशरण्ये ॥ ८ ॥

# ॥ गंगा माता स्तोत्रम् ॥

रोगं शोकं तापं पापं हरहर मे भगवति कुमतिकलापम्।

त्रिभुवनसारे वसुधाहारेत्वमसि गतिर्मम खलु संसारे॥ ९ ॥

अलकानन्दे परमानन्दे कुरुकरुणामयि कातरवन्द्ये।

तव तटनिकटे यस्य निवासःखलु वैकुण्ठे तस्य निवासः॥ १० ॥

वरमिह नीरे कमठो मीनःकिं वा तीरे शरटः क्षीणः।

अथवा श्वपचो मलिनो दीनस्तवन हि दूरे नृपतिकुलीनः॥ ११ ॥

भो भुवनेश्वरि पुण्ये धन्येदेवि द्रवमयि मुनिवरकन्ये।

गङ्गास्तवमिमममलं नित्यंपठति नरो यः स जयति सत्यम्॥ १२ ॥

येषां हृदये गङ्गाभक्तिस्तेषांभवति सदा सुखमुक्तिः।

मधुराकान्तापज्झटिकाभिःपरमानन्दकलितललिताभिः॥ १३ ॥

गंगास्तोत्रमिदं भवसारंवाञ्छितफलदं विमलं सारम्।

शङ्करसेवकशङ्कररचितंपठति सुखीः तव इति च समाप्तः॥ १४ ॥

॥ इति श्रीमच्छङ्कराचार्यविरचितं गङ्गास्तोत्रं सम्पूर्णम्॥